भाषापरिच्छेदः ॥ । विष्णुः । यथा, महा-
भारते । १३ । १४६ । ४३ ।
"ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ॥"
शिवः । यथा, तत्रैव । १३ । १७ । ५२ ।
"तेजोऽपहारी बलहा मुदितोऽर्थोऽजितो-
ऽवरः ॥"
त्रिसप्रतिसाध्यमौलिककायस्थानामन्यतमः । तत्र
अकारान्तोऽयम् । यथा, कुलदीपिकायाम् ।
"ध्यामः चौमो घर वैओगो
वीदस्तेजश्चार्णव आग्रः ॥")
तेजःफलः, पुं, (तेजसे बलाय तेजःप्रदं वा फल-
मस्य ।) वृक्षविशेषः । तेजफल इति भाषा ।
तत्पर्य्यायः । बहुफलः २ शाल्मलीफलः ३
स्रुवकफलः ४ स्रुवेयफलः ५ गन्धफलः ६ कण्ट-
वृक्षः ७ । अस्य गुणाः । कटुत्वम् । तीक्ष्ण-
त्वम् । सुगन्धित्वम् । दीपनत्वम् । वातश्लेष्मा-
रुचिनाशित्वम् । बालरक्षाकरत्वञ्च । इति
राजनिर्घण्टः ॥
तेजनः, पुं, (तेजयति अग्निमिति । तिज + णिच्
+ ल्युः ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥
मुञ्जः । भद्रमुञ्जः । इति राजनिर्घण्टः ॥
(बाणादीनां फलके । यथा, मनुः । ७ । ९० ।
"न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥"
उद्दीपने, क्ली । यथा, सुश्रुते चिकित्सा-
स्थाने । २४ अध्याये ।
"शिरःसुखविविक्तत्वं त्वक्स्थस्यामेश्च तेजनम् ॥")
तेजनकः, पुं, (तेजयतीति । तिज + णिच् + ल्युः
संज्ञायां कन् । यद्वा, तेजनेन फलकेन काय-
तीति । कै + कः ।) शरः । इत्यमरः ।२।४।१६२॥
तेजनी, स्त्री, (तेजयतीति । तिज + णिच् + ल्युः ।
गौरादित्वात् ङीष् ।) मूर्व्वा । इत्यमरः ।
२ । ४ । ८३ ॥ (अस्याः पर्य्याया यथा,—
"तेजनी पिलुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ।
पर्य्यायान्तरं यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
ज्योतिष्मती । इति शब्दरत्नावली ॥ (तेजवती ।
अस्या पर्य्यायाः यथा,—
"तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तेजपत्रं, क्ली, (तेजयतीति । तिज + णिच् + अच् ।
तेजं पत्रमस्य ।) स्वनामख्यातवृक्षः । तज इति
तेजपात इति च भाषा । तत्पर्य्यायः । गन्ध-
जातम् २ पत्रम् ३ पत्रकम् ४ । इति शब्दरत्ना-
वली । अस्य गुणाः । कफवायुशोथहृल्लासारुचि-
नाशित्वम् । इति राजवल्लभः ॥ अमरोक्त-
पर्य्यायास्तु त्वक्पत्रशब्दे द्रष्टव्याः ॥ तस्य नाम-
गुणाः ।
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गं चोचं तथोत्कटम् ।
त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् ॥
पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम् ।
हृद्बस्तिरोगवातार्शःक्रिमिपीनसशुक्रहृत् ॥"
इति भावप्रकाशः ॥
तेजलः, पुं, (तेजति अतिशयेन पालयति शावका-
निति । तिज पालने + बाहुलकात् कलच् ।)
कपिञ्जलपक्षी । इति राजनिर्घण्टः ॥
तेजस्करं, त्रि, (तेजः करोतीति । तेजस् + कृ +
टः ।) तेजोवृद्धिकारकद्रव्यम् । इति वैद्यकम् ॥
तेजस्विनी, स्त्री, (तेजो विद्यतेऽस्याः । तेजस् +
विनिः स्त्रियां ङीप् ।) ज्योतिष्मती । इति शब्द-
रत्नावली ॥ महाज्योतिष्मती । इति राज-
निर्घण्टः ॥ (तेजवल्कल इति च । तत्पर्य्याया
यथा,—
"तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ॥"
अस्या गुणा यथा,—
"तेजस्विनी कफश्वासकासास्यामयवातहृत् ।
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तेजस्वी, [न्] त्रि, (तेजोऽस्यस्तीति । विनिः ।)
तेजोयुक्तः । यथा,—
"महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती ।
शश्वद्विधोक्तं शास्त्रञ्च पठितान्यच्च पण्डितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
(इन्द्रस्य पुत्त्रविशेषः । यथा महाभारते ।
१ । १९८ । २६ ।
"शान्तिश्चतुर्थस्तेषां वै तेजस्वी पञ्चमः स्मृतः ॥")
तेजितः, त्रि, (तिज + क्तः ।) तीक्ष्णीकृतः ।
शाणान इति भाषा । तत्पर्य्यायः । निशितः २
क्ष्णुतः ३ शाणितः ४ । इत्यमरः । ३ । १ । ९१ ॥
शान्तः ५ शाणादिमार्ज्जितः ६ । इति शब्द-
रत्नावली ॥ क्ष्णुतः ७ निशातः ८ शितः ९
शातः १० । इति जटाधरः ॥
तेजीयान्, [स्] त्रि, (तेजो विद्यतेऽस्य । तेजस् +
ईयसुन् ।) तेजोयुक्तः । यथा,—
"अज्ञानी पुरुषः शश्वद्ण्डितश्च स्वकर्म्मणा ।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
तेजोमन्थः, पुं, (तेजो मथ्नातीति । मन्थ + कर्म्म-
ण्यण् ।) गणिकारिका । इति रत्नमाला ॥
तेजोरूपं, क्ली, (तेजः सर्व्वप्रकाशकं चैतन्यं रूपं
यस्य ।) ब्रह्म । यथा,—
"अशरीरं विग्रहवदिन्द्रियवदतीन्द्रियम् ।
यत्साक्षि सर्व्वसाक्षि तेजोरूपं नमाम्यहम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
तेजोवती, स्त्री, (तेजोऽस्त्यस्या इति । तेजस् +
मतुप् मस्य वः ।) गजपिप्पली । इति शब्द-
रत्नावली ॥ चविका । इति रत्नमाला ॥ महा-
ज्योतिष्मती । इति राजनिर्घण्टः ॥ तेजल इति
तेजवल्कल इति च भाषा । तस्याः पर्य्यायगुणाः ।
"तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ।
तेजस्विनी कफश्वासकासास्यामयवातहृत् ॥
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
(अग्नेर्विमानम् । यथा, ब्रह्माण्डे ३८ अध्याये ।
"महाविमानं प्रथितं भास्करं जातवेदसः ।
सा हि तेजोवती नाम हुताशस्य महासभा ॥")
तेजोवृक्षः, पुं, (तेजोयुक्तो वृक्षः । अग्न्युत्पादकत्वा-
दस्य तथात्वम् ।) क्षुद्राग्निमन्थः । इति राज-
निर्घण्टः ॥
तेन, अ, तद्धेतुना । इत्यमरटीकायां भरतः ॥ सेह
निमित्ते इति भाषा ॥
तेनः, पुं, (ते गौरी न शिवो यत्र ।) गानाङ्ग-
विशेषः । यथा, सङ्गीतदामोदरे ।
"तेनेति शब्दस्तेनः स्यात् मङ्गलानां प्रदर्शकः ।
ते शब्देनोच्यते गौरी नशब्देनोच्यते हरः ॥
तेन माङ्गलकश्चायं शब्दस्तेन इति स्मृतः ॥"
तेप, ऋ ङ कम्पे । च्युतौ । इति कविकल्पद्रुमः ॥
(भ्वा-आत्मं-अकं-सेट् ।) ऋ, अतितेपत् । ङ,
तेपते वृक्षः । तितेपे । इति दुर्गादासः ॥
तेमः, पुं, (तिम आर्द्रीभावे + भावे घञ् ।) आर्द्री-
भावः । इत्यमरः । ३ । २ । २६ ॥
तेमनं, क्ली, (तिम + भावे ल्युट् ।) आर्द्रीकरणम् ।
व्यञ्जनम् । इति मेदिनी । ने, ७२ ॥
तेमनी, स्त्री, (तिम्यतेऽनेनेति । तिम + ल्युट् + ङीप् ।)
चुल्लीभेदः । इति हेमचन्द्रः ॥
तेव, ऋ ङ देवने । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्मं-अकं-सेट् ।) देवनमिह क्रीड़ा । ऋ,
अतितेवत् । ङ, तेवते । तेवते बालः कन्दुकै-
र्निलयमिति हलायुधः । देवनमिह रोदनमिति
भट्टमल्लः । इति दुर्गादासः ॥
तेवनं, क्ली, (तेव्यते दीव्यते ऽस्मिन्निति । तेव क्रीड़ा-
याम् + अधिकरणे ल्युट् ।) केलिकाननम् ।
(भावे ल्युट् ।) क्रीड़ा । इति मेदिनी । ने, ७१॥
(यथा,शब्दार्थचिन्तामणिधृतरामायणवचनम् ।
"तेवनेन वनं गत्वा नदीस्तीर्त्त्वा वधूरका ॥")
तैक्ष्ण्यं, क्ली, (तीक्ष्णस्य भावः । तीक्ष्ण + ष्यञ् ।)
तीक्ष्णता । इति व्याकरणम् ॥ (यथा, सुश्रुते ।
१ । ५ ।
"शौर्य्यमाशुक्रियाशास्त्रतैक्ष्ण्यमस्वेदवेपथू ॥"
कठोरता । यथा, रामायणे । २ । २१ । ४४ ।
"तदेतां विसृजानार्य्यां क्षत्त्रधर्म्माश्रितां मतिम् ।
धर्म्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ॥"
क्रूरता । यथा, मनुः । ४ । १६३ ।
"द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥"
"मात्सर्य्यं धर्म्मानुत्साहाभिमानकोपक्रौर्य्याणि-
त्यजेत् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)
तैजसं, क्ली, (तेजसो विकारः । तेजस् + "तस्य
विकारः ।" ४ । ३ । १३४ । इत्यण् ।) घृतम् ।
इति स्मृतिः ॥ धातुद्रव्यम् । इत्यमरः ।२।९।९९॥
(यथा, मनुः । ५ । १११ ।
"तैजसानां मणीनाञ्च सर्व्वस्याश्ममयस्य च ॥"
तीर्थविशेषः । यथा, महाभारते ।९।४६।१०३।
"तैजसं नाम तत्तीर्थं यत्र पूर्व्वमपाम्पतिः ।